A. एतद्राज्यं मम भ्रात्रा दत्तं सन्नयासवत्स्वयम् ।
योगक्षेमवहे चेमे पादुके हेमभूषिते ॥

B. यन्मङ्गलं सहस्राक्षे सर्वदेवनमस्कृते ।
वृत्रनाशे समभवत्तत्ते भवतु मङ्गलम् ॥

C. अद्य प्राप्ता तपस्सिद्धिः तव संदर्शनान्मया ।
अद्य मे सफलं तप्तं गुरवश्च सुपूजिताः ॥

D. पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥

E. दशयोजनविस्तीर्णम् शतयोजनमायतम् ।
ददृशुर्देवगन्धर्वाः नलसेतुम् सुदुष्करम् ॥

F. छत्रं तु तस्य जग्राह शत्रुघ्नः पाण्डुरं शुभम् ॥
श्वेतं च वालव्यजनं सुग्रीवो वानरेश्वरः ।
अपरं चन्द्रसङ्काशं राक्षसेन्द्रो विभीषणः ॥

H.विक्रान्तस्त्वं समर्थस्त्वं प्राज्ञस्त्वं वानरोत्तम ।
येनेदं राक्षसपदं त्वयैकेन प्रधर्षितम् ॥

G. युवाभ्यां सह धर्मात्मा
सुग्रीवस्सख्यमिच्छति ।

तस्य मां सचिवं वित्तं वानरं पवनात्मजम् ॥

I. कोन्वस्मिन्साम्प्रतं लोके
गुणवान्कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः॥

J. गङ्गायाः पतनं राजन् पृथिवी न सहिष्यति ।
तां वै धारयितुं वीर नान्यं पश्यामि शूलिनः॥

K.आनयेनम् हरिश्रेष्ठ दत्तमस्याभयम् मया ।
विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् ॥

L. सुखं वने निवत्स्यामि यथैव भवने पितुः।
अचिन्तयन्तीत्रीन्लोकान् चिन्तयन्ती पतिव्रतम् ।

M.भङ्क्त्वा वनं महातेजा हत्वा रक्षांसि संयुगे ।
दग्ध्वा लङ्कापुरीं रम्यां रराज स महाकपिः ॥

N. ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम् ।
सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ ॥

O. तेषामेवं प्रभावानां सर्वेषां दीप्ततेजसाम् ।
पिता दशरथो हृष्टो ब्रह्मा लोकाधिपो यथा ॥

P. कृतम् हनुमता कार्यम् सुमहद्भुवि दुर्लभम् |
मनसापि यदन्येन न शक्यम् धरणीतले ||

Q.अग्निं प्रदक्षिणीकृत्य वेदिं राजानमेव च ।
ऋषींश्चैव महात्मानस्सभार्या रघुसत्तमाः ॥

R. तौ तथा युध्यमानौ तु समरे रामरावणौ ।
ददृशुः सर्वभूतान्नि विस्मितेनान्तरात्मना ॥

S. स भास्कराध्वानमनुप्रपन्नस्
तद्भास्कराभं शिखरं प्रगृह्य ।
बभौ तदा भास्करसंनिकाशो
रवेः समीपे प्रतिभास्कराभः ॥

T.आरोप्य स धनू राम: शरं सज्यं चकार ह।
जामदग्न्यं ततो रामं राम: क्रुद्धोऽब्रवीद्वच: ॥

ब्राह्मणोऽसीति पूज्यो मे विश्वामित्रकृतेन च।
तस्माच्छक्तो न ते राम मोक्तुं प्राणहरं शरम् ॥